# संस्कृत-वार्ता:

**दिनाङ्क :-20.06.2024**

**प्रात: - 06:55**

## अथ वार्ता:

### केन्द्रिय-मन्त्रिमंडल

चतुर्दश श्रावणीय सस्यानां न्यूनतमसमर्थनमूल्यं वर्धयितुं, महाराष्ट्रे वाधवनबन्दरस्य विकासं कर्तुं, गुजराततमिलनाडुषु च प्रथमं अपतटीयपवनस्थानकं विकसितुं च सर्वकारेण निर्णयः कृतः अस्ति। वाराणसीविमानस्थानकस्य विकासाय, राष्ट्रियन्यायिकमूलसंरचनासम्वर्धनयोजनाय च सर्वकारेण निर्णयाः कृताः सन्ति। ह्य: नवदिल्ल्यां वार्ताहरान् सम्बोधयन् सूचनाप्रसारणमन्त्री अश्विनीवैष्णवः अवदत् यत्, मन्त्रिमण्डलस्य सत्रे सर्वकारेण पञ्च प्रमुखाः निर्णयाः कृताः। निर्णयानां विषये प्रवदन् श्री वैष्णव अवदत् यत् मन्त्रिमण्डलेन चतुर्विंशत्यधिक द्विसहस्र-पञ्चविंशत्यधिक द्विसहस्रतम वर्षस्य विपणनस्य ऋतोः कृते चतुर्दश श्रावणीय सस्यानां न्यूनतमसमर्थनमूल्यानां (MSP) अनुमोदनं कृतम्। सः अवदत् यत्, धान्य, कपास, प्रियङ्गु, द्विदल, तैलबीजानां कृते एमएसपी इत्यस्य महती वृद्धिः कृषकाणां लाभाय भविष्यति। मन्त्री उक्तवान् यत्, प्रधानमन्त्रिणः नरेन्द्रमोदीन: तृतीयः कार्यकालः अतीव महत्त्वपूर्णः अस्ति यतः एतत् कृषकाणां हिताय अनेकनिर्णयानां माध्यमेन परिवर्तनेन सह निरन्तरतायां केन्द्रितः अस्ति। सः अवदत्, सर्वकारः देशे सर्वत्र द्वि लक्षं यावत् भण्डाराणां निर्माणार्थं कार्यं कुर्वन् अस्ति। वैष्णवमहोदयः अवदत् यत्, महाराष्ट्रस्य वाधवननगरे सर्वकारेण ग्रीनफील्ड्- जलपोतस्थानकस्य विकासस्य निर्णयः कृतः। सः अवदत् यत्, अस्य जलपोतस्थानकस्य निर्माणे षड् सप्ततिः सहस्राधिक कोटिरूप्यकाणां व्ययं भविष्यति तथा च समाप्तेः अनन्तरं एतत् विश्वस्य शीर्ष दश जलपोतस्थानकेषु अन्यतमं भविष्यति। सः अवदत् यत्, एतत् जलपोतस्थानकं आगामिषु वर्षेषु प्रायः द्वादश लक्षं वृत्यवसरान् जनयिष्यति। वैष्णवमहोदयः अवदत् यत्, देशे नवीकरणीय ऊर्जाक्षमतां वर्धयितुं सर्वकारः निरन्तरं कार्यं कुर्वन् अस्ति तथा च अस्मिन् दिशि प्रथमानि अपतटीयपवनस्थानकानि विकसितुं सर्वकारेण निर्णयः कृतः। सः अवदत् यत्, गुजरात-तमिलनाडु-राज्ययोः पञ्च शतं यावत् मेगा-वाट्-क्षमतायुतौ परियोजनाद्वयं आरप्स्यते। मन्त्रिणा इदमपि सूचितं यत् मन्त्रिमण्डलेन वाराणस्याः लालबहादुरशास्त्री-अन्तर्राष्ट्रीयविमानस्थानकस्य विकासाय ऊनषष्ट्यधिक अष्टशतोत्तर द्विसहस्र कोटिरूप्यकाणां व्ययेन अनुमोदनं कृतम् अस्ति। अन्यस्य निर्णयस्य विषये वदन् वैष्णवमहोदयः अवदत् यत् मन्त्रिमण्डलेन राष्ट्रियन्यायिकमूलसंरचनासम्वर्धनयोजनायाः अनुमोदनं कृतम् यस्य अन्तर्गतं राष्ट्रियन्यायिकविज्ञानविश्वविद्यालयस्य परिसरात् बहिः केन्द्रीयन्यायिकविज्ञानप्रयोगशालाः च देशे सर्वत्र स्थापिताः भविष्यन्ति।

### वित्तमन्त्री

वित्तमन्त्रिणा निर्मला-सीतारामन् इत्यनया ह्य: नवदिल्ल्यां सामान्यं चतुर्विंशत्यधिक-द्वि-सहस्र-पञ्चविंशत्यधिक-द्वि-सहस्र-तमवर्षयो: अर्थसंकल्प-पत्रं निधाय प्रमुखै: अर्थशास्त्रज्ञै: परामर्शस्य प्रथमचरणस्य अध्यक्षता कृता। एतस्मिन् आध्यक्षयुते सत्रे केन्द्रीय वित्तराज्यमन्त्री पंकजा-चौधरी वित्तसचिव: वित्तमन्त्रालस्य विभागानां सचिवा: राजस्वाधिकारिण: मुख्यार्थिक-परामर्शदाश्च सम्मिलिता: अभवन्।

### स्वास्थ्य-मंत्रालय

यथा अति-ताप-तरङ्गस्य कारणेन देशस्य अनेकभागेषु ताप-प्रकोपस्य प्रकरणानि वर्धन्ते, अतः केन्द्रीय-स्वास्थ्य-मन्त्रालयेन ह्य: राज्य-स्वास्थ्य-विभागानाम् कृते निर्देशपत्रं दत्वा ताप-सम्बद्ध-रोगाणां निवारणाय तत्परतां, समये प्रतिक्रियां च सुनिश्चितं कर्तुं निर्दिष्ट म्। राज्यस्य प्रभारग्रहण-अधिकारिणः ताप-सम्बद्ध-रोगाणां विषये राष्ट्रिय-कार्ययोजनां (HRI) प्रसारयितुं, जनपद्-नगर-स्तरयोः स्वास्थ्य-कार्ययोजनानि कार्यान्वितुं च आह। परामर्शपत्रे पठितं यत् एचआरआइ-कृते स्वास्थ्यव्यवस्थायाः सज्जतां सुदृढां कर्तुं महत्त्वपूर्णम् अस्ति, यत्र तापघातप्रकरणानाम्, मृत्योः च नियमितरूपेण प्रदत्तांशानां प्रस्तुतीकरणं, तापस्वास्थ्यकार्ययोजनानां अद्यतनीकरणाय, अनुमोदनाय च कार्यदलस्य सभायाः आयोजनं च अन्तर्भवति।

**।।इति वार्ता:।।**